No. ४६३६

Title गोदानविधिः

Author ×

Extent ७ पत्राणि Age ×

Subject धर्मशास्त्रम्

गोदानविधिः

४६३६

4636/6

45

गो दान

१५।

श्री गणेशायनमः ॥ देवदेवं नमस्कृत्य सर्वविघ्नविनाशनं ॥ वक्ष्ये सप्तगुरुणादिष्टं गोदानं तत्फलं स्मृ
१ तं ॥ १ ॥ तत्र तरुणीं रूपसंपन्नां सुशीलां च पयस्विनीं ॥ सवत्सां गां समानीय ब्राह्मणाय निवेदये
त् ॥ २ ॥ प्रदेया ब्राह्मणाय गौः ॥ वृद्धा सरोगा हीनांगी वंध्या दुष्टा मृतप्रजा ॥ हृस्वाऽन्यायत्न द्वेया
स न देया ब्राह्मणाय गौः ॥ ३ ॥ सीदते वटुभृत्याय श्रोत्रियाय हिताग्नये ॥ अतिथिप्रियाय दांताय धे
नुं दद्यात् द्विजातये ॥ ४ ॥ मोगपैसाख्यप्रदा श्वेता धौम्रा पापप्रनाशिनी ॥ कृष्णा स्वर्गप्रदा प्रो
क्ता गौरी स्वकुलवर्द्धिनी ॥ ५ ॥ धूम्रा ज्ञी सुखदा ज्ञेया पीता दारिद्र्यनाशिनी ॥ पाटला पुत्रदा प्रो राम
क्ता नीला धर्मप्रवर्द्धिनी ६ कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ॥ सुवर्णेन प्रकर्तव्यं मंड १

लंशृंगयोर्हृदयोः ॥ ७ ॥ एकैकस्मिन्प्रदेशे जनरोप्ये नूखुरमंडलं ॥ ताम्रपृष्ठप्रमाणं तु पंचाशत्पलसंख्य
या ॥ ८ ॥ तदर्द्धेन प्रमाणेन कर्त्तव्यं कांस्यदोहनं ॥ गोदानप्रतिष्ठार्थं स्वर्णमेकं प्रतिष्ठितं ॥ ९ ॥ स्वर्ण
शृंगी ताम्रपृष्ठी नौप्यखुरैः सुशीला वस्त्रसंयुता ॥ सकांस्यपात्रे दातव्या न्क्षीरिणी गौः सदक्षिणा नि
॥ १० ॥ दानेन स्वर्गमाप्नोति वत्सरान्रोमसंमितान् ॥ कपिला चोत्तारयति दातुर्वै सप्तमं कुलं ।
११ ॥ गोमयोपलिप्तभूमिभागे चतुष्कोणे प्राङ्मुखमुपविश्य कुशत्रयतिलजलान्यादाय गोदानम
हं करिष्य इति संकल्प्य ॥ १२ ॥ ततो ब्राह्मणवरणं ॥ गोदाननिमित्तं ब्राह्मणे पाद्यासनमस्तु ॥ ब्राह्म
णः ॐ आमहं करिष्ये ततस्तं समभ्यर्च्य गंधपुष्पादिभिः ॥ १३ ॥ मंत्रेण ॥ नमोस्त्वनंताय सहस्रमूर्तये स

हस्रपादाक्षिशिरोरुबाहवे॥सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः॥२४॥नमो
ब्रह्मण्यदेवायगोब्राह्मणहितायच॥जगद्धितायकृष्णायगोविंदायनमोनमः॥२५॥युञ्जन्तिब्रध्नं
॥युञ्जन्तिब्रध्नमरुषंचरन्तंपरितस्थुषः॥रोचंतेरोचनादिवि॥२६॥युञ्जन्त्यस्य॥काम्याहरीविप
क्षसारथे॥शोणाधृष्णूनृवाहसा॥२७॥अदन्नमीमदन्त॥अदन्नमीमदन्तह्यवप्रियाअधूषत
॥अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी॥२८॥अमुकशर्माहंअमुकगोत्रम
मुकशर्माणंब्राह्मणमऽमुकवेदाध्यायिनमेभिस्ताम्बूलस्वर्णचंदनवस्त्रादिभिरलंकृत्यशाखोक्तफ राम
लप्राप्तिकामःगोत्राहित्वेनत्वामहंवृणे॥२९॥वृतोस्मीतिप्रतिवचनं॥व्रतेनदीक्षामाप्नोतिदीक्ष्‍ २

याप्नोतिदक्षिणाद्दक्षिणा स्वद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥२०॥ यत्स्वं नैकृतं विप्रतव विष्णुस्व
रूपिणः ॥ तत्सर्वं मम दानस्य विघ्नवेतु समर्प्यतां ॥२१॥ एवं प्रार्थ्य स्वरूपतः ॥ गोभ्योयज्ञाः प्रव
र्त्तंते गोभ्यो देवाः समुत्थिताः ॥ गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमाः ॥२२॥ गणानां त्वेति
कलशकरणं ॥ एतानि गंधपुष्पधूपदीपतांबूलउपनीतनैवेद्यादि गणेशकलशवरुणब्रह्म
देवताभ्यो नमः ॥२३॥ वारत्रयं पूजयेत् ॥ ॐ कलशाय नमः ॥ गणानां त्वा मंत्रः ॥ लक्ष्मी सरस्वती
इहागच्छ इह तिष्ठ इह स्थिरा भव ॥ श्रीश्च ते लक्ष्मी मंत्रः ॥२४॥ गंधं समर्प्ययामि ॥ पुष्पं समर्प्यया
मि ॥ धूपं समर्प्ययामि ॥ दीपं समर्प्ययामि ॥ नैवेद्यं समर्प्ययामि ॥ तांबूलं समर्प्ययामि ॥ पूगफलं सम

3

र्प्पयामि। इदं अर्घं समर्प्पयामि। एतानि गंधपुष्पधूपदीपताम्बूलउपनीतनैवेद्यानि लक्ष्मीसरस्वती
भ्यां नमः॥ अथानंतरं गोपूजा॥ २६॥ ग्रासमुरवी गामवस्थाप्यवस्त्रमुत्तरतोन्यसेत्॥ दातापूर्व
मुखोभवेत्पतिग्राही उदङ्मुखः॥ २७॥ अथ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनु
रूपेण सा देवी मम पापं व्यपोहतु। गोग्रपादाभ्यां नमः॥ २८॥ देवस्था या तु या देवी रुद्राणी शंकर
प्रिया॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ गोमुखाय नमः॥ २९॥ विष्णोर्वक्षसि या लक्ष्मी
ः स्वाहा या च विभावसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रियै॥ गोशृंगाभ्यां नमः॥ ३०॥ राम
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥ या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे॥ गोपृष्ठा ३

यनमः॥३१॥स्वधात्वंपितृमुख्यानांस्वाहाहुतभुजस्तथा॥सर्वपापहराधेनुस्तस्माच्छान्तिंप्रय
च्छमे॥ओंपुष्ट्यायनमः॥३२॥एतेषुष्यानेषुगंधपुष्पाक्षतादिभिःपूजयेत्॥ओंकृष्णायनमः।
पवित्राभ्योनमः।श्रीमतिभ्योनमः॥ब्रह्मसुताभ्योनमः॥सुरभिभ्योनमः॥३४॥आनंदरूपालो
केषुदेवानांरसदाप्रिये॥ओंस्वरूपाहिजगन्मातर्धूपोयंप्रतिगृह्यतां ३५ आनंदःसर्वलोकानां
देवानामपिवप्रियः॥त्वंहिफाहिजगन्मातर्दीपोयंप्रतिगृह्यतां ३६ आल्हादनंमयादत्तंस
म्यक्शुद्धंसुनिर्मलं।सुरभेवस्त्रदानेनप्रीयतांपरमेश्वरः।३७ सुरभेत्वंजगन्मातर्देविविष्णुपदे।
स्थिता॥नैवेद्यंवमयादत्तंभवत्याप्रीयतामिति ३८ सुरपेत्वंजगन्मातर्देविविष्णुपदेस्थिता
।सर्वदेवमयोग्रासोदत्तोयंप्रतिगृह्यतां ३९ यत्नेमयार्चितंशुद्धंचंद्राचामरमंडितं॥ग्रैदेयंत

कृशाणोदंमुनित्रिदशवंदिते ४० आवाहयाम्यहंदेवींसुरभिंलोकमातरं॥पूज्यांत्रिभुवनेदेवींगंध
४ र्वैःकिन्नरैःसह ४१ मानुषैर्योगिभिश्चैववन्दीतांत्रिजननींपरां॥अमृतश्राविणींदद्यात्सर्वयज्ञप्र
वर्तिनी ४२ देवित्वंसर्वभूतानांजननीसर्वकामदा॥ममकामदुघाधेनोभवेज्जन्मनिजन्मनि ४३
तारयस्वमहादेविदुःखहादुष्टसागरात्॥दिव्यागतिंदेविदेवप्रयच्छसुरवंदिते ४४ इत्यावाह
ने॥अथन्यासः॥उरःस्कंदःशिरोब्रह्माललाटेगरुडध्वजः॥कर्णयोरश्विनौदेवौचक्षुषोःश
शिभास्करौ॥दंतान्मरुद्गणोदेवोजिह्वायांवरुणःस्थितः ४५ कंठेचसर्वशास्त्राणिहृदयेहंस
वाहनः॥अपानेसर्वतीर्थानिप्रश्रवेजाह्नवीजलं ४६ ऋषयोरोमकूपेषुगंडयोःवैवस्वतोय राम
मः॥धनदोवरुणश्चैवदक्षिणेकुक्षिमाश्रितः ४७ वामपार्श्वेस्थितायक्षास्कंदवंतोमहाबलाः ४

तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ६५ गंधर्वाकिंनराश्चैवदत्तात्रेयाङ्गि(द्या)भार्गवाः॥वशिष्ठोंगि
राश्चैवकाश्यपेयाश्चकाश्यपाः॥तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ६६ ऋषयोमुनयो
देवाश्चाधस्ताद्भुविदेवताः॥वाय्वाधाराजलाधाराश्चतस्थामुन्यपस्तथा ६७ सरितःसागराश्चैवप
र्वतावनमेवच॥तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ६८ स्वाहास्वधातथालक्ष्मीःबुद्धिः
श्रद्धासरस्वती॥मेधाप्रीतिस्तथालज्जाकीर्तिःप्रीतिस्तथैवच॥ताःसर्वास्तृप्तिमायांतुगोपुच्छोद
कतर्पणैः ६९ ब्रह्माद्यादिपत्रयस्त्रिंशत्कोटिकः॥वसतिमध्येयेकविदामताःशुक्लगोवरे॥
तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ७० आदित्यादिग्रहाःसर्वेक्रमात्सान्याशिवन्यादयः॥मे
षादिराशयश्चैवयोगाविष्कंभकादयः ७१ ते॥ततःकंठस्त्रीभूत्वोत्तराभिमुखः॥सनकश्च

सनंदश्चतृतीयश्चसनातनः।।कपिलश्चासुरिश्चैववोढुःपंचशिखंतथ्याते।।७२।। ततोपसव्यं।।
६ दक्षिनामुखः।।कव्यवाडायनमः।।वर्हिषदायनमः।यमायनमः।धर्म्मराजायनमः।।अंतकायनमः।
मृत्यवेनमः।।वृकोदरायनमः। परमेष्ठिनेनमः।।औदुंबरायनमः।कालायनमः।नीलायनमः।।दध्नायन
मः।चित्रायनमः।चित्रगुप्तायनमः।।७४।।ततःपितृपितामहश्चपितामहाः।।मातामहश्चमातामहवृद्धप्र
6 मातामहाः।।७५।।मातृपक्षाश्चयेकेचित्येचान्येपितृपक्षकाः।गुरुश्वशुरबंधूनांयेकुलेषुसमुद्भवाः।।
७६।।येवान्येलुप्तपिंडाश्चपुत्रदारैर्विवर्जिताः।।तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्प्पणैः।।७७।।आब्रह्म
णोयेपितृवंशयातामातुस्तथावंशभयामदीयाः।।कुलद्वयेयेममदासभूताभृत्यास्तथैवाश्रितसेव एम
काश्च।।७८।।मित्राणिशिष्याःपशवश्चवृक्षादृष्टाश्चस्पृष्टाश्चकृतोपकाराद्देशांतरेयेममसंगताश्च ६

तेभ्यः स्वधा कृत्य जलं ददामि॥ ते॥ ७९॥ ये बांधवा बांधवा वा ये ऽन्यजन्मनि बांधवाः॥ अकालोपगता ये च
ये चान्ये गर्भवस्तथा॥ ते॥ ८०॥ विरूपा आमगर्भा ये ज्ञाताज्ञाताः कुले मम॥ आमगर्भाश्च ये केचिद्गता उ
च्छगोत्रे॥ ते॥ ८१॥ वृषयोनिंगता ये च ये च कीटपतंगकाः॥ नरके रौरवे ये च कुंभीपाके तथैव च॥ ते सर्वे
तृप्तिमायांतु गंगापुण्योदकतर्पणैः॥ ८२॥ सर्वं कृत्वा बध्वा॥ कुशत्रयतिलजलान्यादाय॥ अद्येहेत्यादि प
ठित्वा सशैलवनसचतुरार्णवमहीदानसमफलप्राप्तिकामः तद्रोमसहस्रसंख्यायुगलावच्छिन्नदेवलो
कमहितत्व पितृपितामहप्रपितामहनरकोद्धरणहेतोः सप्तकुलसमुद्धरणकामनया पूर्वार्जितदुरि
तौघविनाशनाय इहजन्मनि ज्ञाताज्ञातपापक्षयार्थं पुत्रपौत्रादिसमृद्ध्यर्थं अमुकगोत्रोऽहममुकशर्मा
हं सकलपापक्षयपूर्वकपरत्र दिव्यस्त्रीपरिमंडितकांचनविमानावरोहणस्वेच्छापूर्वकगमनदर्शना

ह्लादसंजातहेमशरीरनिर्द्दग्धवृजिनामलपवित्रमूर्त्याग्नितेजः समानमुविराजमानां परमपदप्राप्ति
कामः॥ इमां कपिलां गां हेमशृंगीं रौप्यखुरां ताम्रपृष्ठीं कांस्यदोग्ध्रीं वस्त्राभरणभूषितां मुक्ताभूषित
लांगूलां पदवस्त्रच्छन्नां रुद्रदैवतां सदक्षिणां अमुकगोत्रायऽमुकशर्मणे ब्राह्मणाय दातुमहं संप्रददे
॥ यज्ञपुरुषः प्रीणातु॥ एतद्गोदान प्रतिष्ठार्थं संसिध्यर्थं स्वर्णमग्निदैवतं तुभ्यमहं संप्रददे॥ यज्ञपुरुषः
प्रीणातु॥ हेममयि नमस्कृत्य सूर्यरश्मिसमुद्भवे॥ रक्ष मां सर्वभूतेभ्यो विश्वमातर्नमोस्तुते॥ ततो प्र
दक्षिणां॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तानि तानि विनश्यंति प्रदक्षिणपदे पदे॥ या
लक्ष्मीर्लोकपालानां सर्वदेवेषु संस्थिता॥ सा लक्ष्मीर्धेनुरूपेण मम पापं व्यपोहतु॥ चतुर्मुखस्य राम
या लक्ष्मीर्या लक्ष्मीर्धनदस्य च या लक्ष्मीर्धेनुरूपेण मम पापं व्यपोहतु॥ ततस्तुतिः॥ गावो मामुप ७

तिष्ठंतहेमशृंगाः पयोमुचः ॥ सुरभ्यः सौरभेयाश्च सरितः सागरं यथा ॥ गां वै पश्याम्यहं नित्यं गावः पश्यं
तु मां सदा ॥ गावोऽस्माकं वयं तासां यतो गावस्ततो वयं ॥२॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं ।
एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति ॥ गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः ॥ गावः प्रतिष्ठा भू
तानां गावः स्वस्त्ययनं महत् ॥ अन्नमेव परं गावो देवानां हविरुत्तमं ॥ पावनं सर्वभूतानां रक्षंति हरं
ति च ॥१०१॥ हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि ॥ ऋषीणामग्निहोत्रेषु गावो होमे प्रतिष्ठिताः ॥१०२॥
सर्वेषामपि देवानां गावः शरणमुत्तमं ॥ गावः पवित्रं परमं गावो मंगलमुत्तमं ॥१०३॥ गावः स्वर्गस्य सो
पानं गावो धन्याः सनातनाः ॥ घृतक्षीरप्रदा गावः घृतयोन्यो घृतोद्भवाः ॥१०४॥ घृतनद्यो घृतावर्त्ता
स्ता मे संतु सदा गृहे ॥ घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं ॥५॥ घृतं मे सर्वतश्चैव घृतं मे मनसि स्थि

तं॥ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः॥६॥ गावो मे पार्श्वतः सन्तु गावां मध्ये वसाम्यहं॥ इति प्रद
क्षिणी कृत्वा नमो गोभ्य इति गां नत्वा॥ ७॥ ततो दाता सूर्यमवलोकयति॥ ब्राह्मणं नत्वा॥ अद्येत्यादि
॥ विष्णुपरमपदगमनेतल्लोकिकसौख्याप्तुनारोग्यपहरिस्मरणादशार्बुदसहस्राब्दादशसहस्राब्धि
न्नवर्मविदाप्तीयशोकदुःखदौर्गत्यानवाप्तिकामः इमां नवगाः वस्त्रसंयुताः सदक्षिणाः ब्राह्मणे
भ्योहं प्रददे॥ अथ वृषभदानं॥ पूजामंत्रः॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकं॥ अष्टमूर्तेरधिष्ठा
नत्राहि मां त्वन्नराडुवि॥ ए॥ प्रीयतां धर्मराजो मे लोकपाला ग्रहास्तथा॥ अद्येत्यादि॥ सर्वपापक्षय
विमुक्तिपूर्वकत्र्यमरावीगमनकामोऽमुं दशधेनुसहितं रुद्रदैवतं सवस्त्रं सदक्षिणं अमुकगोत्रा राम
यअमुकशर्मणे ब्राह्मणाय ददे॥ वृषभदानप्रतिष्ठासंसिध्यर्थं स्वर्णममिदैवतं अमुकगोत्राय अ